Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:7(2), July, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

# भृगुप्रोक्तस्य वासाधिकारस्य बिम्बप्रतिष्ठाविचारः

**श्रीमती लिङ्गारेड्डि उमामहेश्वरी**
शोधच्छात्री आगमविभागः
जातीयसंस्कृतविश्वविद्यालयः तिरुपतिः, आं.प्र.
Cell: 91820 75761

---

**वेदानां व्यसनात् पूर्वं प्राग्रूपं मिलितन्तु यत् ।**
**तान्तु वैखानसीं शाखाम् इति वेदविदो विदुः[1] ।।**

वेदानां व्यसनात् पूर्वं वेदराशेः वैखानसी शाखा इति प्रसिद्धा वर्तते। शाखा इयं अत्यन्तं प्राचीना । प्ररब्रह्मणः हृदयपुटात् आविर्भूतस्य वेदराशेः औखेयमिति नामान्तरमप्यस्ति।

परब्रह्मणः सकाशात् आवर्भूतस्य औखेयस्य आदिमः ग्रन्थः "श्रीवैखानसकल्पसूत्रम्"। इदं सूत्रं श्रीविखनोमुनिद्वारा आविष्कृतं श्रीमन्नारायणपारम्यं सर्वसूत्रेषु आदिमं विष्णुसम्बद्धम् अष्टादशक्रियासमन्वितं मनु-आपस्तम्ब-बोधायनादिभिः मानितं कृष्णयजुर्वेदतैत्तिरीयशाखासम्बद्धं च भवेदिति सार्वजनीनो ऽयमंशः।

सूत्रमेतत् शिरसि संधार्य श्रीविखनोमुनिशिष्याः भृगु-मरीचि-अत्रि-कश्यपाः ऋषयः अधिकार-संहिता-तन्त्र-काण्ड-नामभिः वैखानसं शास्त्रम् उपदश्यि लोके प्रसारितमकुर्वन्।

**मार्गं चतुर्विधं प्रोक्तं मया चैव मरीचिना ।**
**आत्रेयं काश्यपेयं च मार्गं तन्त्रचतुष्टयम् ।।**

**ग्रन्थसंख्या विशेषेण प्रतिमार्गं प्रचक्षते ।**
**सूत्रं विखनसा प्रोक्तं पुराचैव सुविस्तरम् ।।**

**हरेः पूजा विधानं तत्तदुक्तं वेदमार्गतः[2] ।**

इत्युक्तरीत्या हरेः पूजाविधानं स्पष्टम् उपदिष्टवन्तोऽभवन् चत्वारः एते ऋषयः ।

चतुर्षु श्रीविखनोमुनिशिष्येषु अन्यतमः भृगुमहर्षिः। असी अधिकारनाम्ना त्रयोदशग्रन्थाः उपदिष्टः[3]। त्रयोदशसु ग्रन्थेषु विशिष्टः विनूनः साङ्गोपाङ्गैरसहितः आलयनिर्माण-विग्रहनिर्माण-विग्रहकल्पन-मूर्तिप्रतिष्ठा-अर्चन-स्नपन-उत्सव-प्रायश्चित्तांशैः संहितः श्लोकरूपः त्रिपञ्चाशदध्यायैः सहितः भवति अयं ग्रन्थः[4] ।

अस्मिन् भृगुप्रोक्तास्य वासाधिकारस्य ग्रन्थे विम्वप्रतिष्ठाविचारः कथं प्रस्तुतः ? के के अंशाः निर्दिष्टाः ? तेषां प्रयोजनं किं? इति यथामति पत्रेऽस्मिन् प्रस्तोतुमिच्छामि।

प्रतिष्ठाविचारे प्रतिष्ठाशब्दार्थः द्रव्यसंसिद्धीकरणं नयनोन्मीलनं अधिवासः कुम्भपूजा होमः आवाहनम् इत्येते अंशाः सन्ति तान् विव्रितुमिच्छामि वासाधिकारोक्तदिशा।

**१. प्रतिष्ठाशब्दार्थः**

> **प्रतिबुद्ध्या प्रतिष्ठा चेत् प्रतिष्ठेत्युच्यते बुधैः ।**
> **तेनैव द्विविधं प्रोक्तं सहैव पृथगेव वा[5] ।।**

सर्वत्र व्यापिनः परमात्मनः एकत्र सकलीकरणेव प्रतिष्ठा। कर्मेदं समूर्तस्थापनं भवेत्।

अस्मिन् प्रतिष्ठाकर्मणि विशिष्टाः । विषयाः सन्तिः तान् यथाशक्ति पश्यामः ।

यज्ञपुरुषः श्रीमन्नारायणः निराकार एव । निराकारस्य परमात्मनः साकारपरिकल्पनं प्रतिष्ठाकर्मणि प्रधानतमः अंशः भवेत्। सा च प्रतष्ठिा आगमोक्तदिशा कलौ युगे ग्रामे ग्रामे अवश्यं करणीया।

प्रतिष्ठाक्रियाः सर्वाः निर्वहणार्थ अनुष्ठानार्थ च आचार्यः अवश्यं वरणीयः। तस्य लक्षणं कीदृशं? वर्जनीयः आचार्यः कीदृशः ? इति प्रथमं परिशीलयामः।

**२. आचार्यलक्षणम्**

आचार्यः तावत् गुणसम्पन्नः रोगरहितः पन्नी अपत्यसहितः सर्वलक्षणसम्पन्नः भवतु[6]। असौ एव प्रतिष्ठाङ्गक्रियास्सर्वा अनुष्ठानार्थ संसिद्धो भवेत् ।

तत्र वपुर्वीनः व्याघ्राक्षः बधिरः उन्मादी कुष्ठुअपस्मारसहितः बिडालाक्षः वक्रदन्तः कपिलाक्षः उग्रवीक्षणः स्त्रीलिङ्गनामधारी षण्डः गुरुनिन्दकः यः सः त्याजः आचार्यः भवतु इति वणर्जनीयस्याचार्यस्य लक्षणमपि वासाधिकारे[7] उपदश्यिते ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:7(2), July, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

**३. द्रव्यसंसिद्धीकरणम्**

प्रतिष्ठाङ्गद्रव्याणि विम्बप्रतिष्ठार्थं अवश्यं संपादनीयानि स्युः। तत्र

होमार्थं अरणी स्रुक्-स्रुवौ जुहू उपजुहू दर्वी दर्भमाला मन्थदण्डं ऊर्ध्वपट्टी आज्यं वस्त्रं समित् श्रीवत्स-पूर्णकुम्भ भेरी आदर्श मत्स्ययुग्म-अङ्कुश-शङ्ख-आवर्तानीति अष्टमङ्गलदव्याणि तोरणानि सभ्य-गार्हपत्य-आहवनीय-अन्वाहार्य आवसथ्य-पौण्डरीकाग्निकुण्डानि हुलिक ताडनी द्रव्याणि नयनोन्मीलनार्थं स्नानार्थं तावत् पञ्चगव्य क्षीर-मध्वादि द्रव्याणि स्नानगर्तम् इत्येतानि प्रधानद्रव्याणि संसिद्धीकरणीयानि भवन्तीति वासाधिकारे[8] प्रोच्यते ।

**४. नायनोन्मीलनम्**

नवानां बिम्बानां नयनोन्मीलनं प्रतिष्ठाङ्गतया अवश्यं करणीयम्।

आदौ शिल्पी अमन्त्रकं नयनोन्मीलनं करोति। ततः आचार्यः सम्यक् वैदिक्या पद्धत्या करिष्यति।

आज्य-मधु-दधि-क्षीर-तिल-तण्डुल-गवादीनि द्रव्याणि अभिमुखे पृथक् पृथक् संस्थाप्य प्रच्छन्नपटं परिकल्प्य हुलिकां ताडनीं च सङ्गृह्य आत्मरक्षापूर्वकवास्तुहोमं विधाय द्विलोचने नक्षत्रे दिने तत्तन्मन्त्रैः दक्षिणवामनेत्रयोः उन्मीलनं कृत्वा प्रच्छन्नपटं विसृज्य तत्तद्रव्यादीनां स्पर्शपूर्वकप्रदर्शनं प्रथमेक्षणं च ददाति। इदमेव नयनोन्मीलनंभवेत्[9]।

**५. अधिवासः**

समन्त्रकनयनोन्मीलनद्वारा सर्वान् भक्तजनान् परमात्मा पश्यन् अनुगृह्णाति।

प्रतिष्ठाङ्गतया बिम्बशुद्ध्यर्थं अधिवासः कार्यः। अहोरात्रयोः अयं कर्तव्यः । असौ द्रव्यभेदेन पञ्चगव्य क्षीर जलैः त्रिधा भिद्यते ।

गोमूत्रं गोमयं गोक्षीरं गोदधि गोसर्पिः एतैः पञ्चगव्यद्रव्यैः जलेन सह मिश्रमं कृत्वा पञ्चगव्याधिवासः कार्यः। क्षीराधिवासः तथा नद्यां तटाके समुद्रे वा जलाधिवासः तत्सम्बद्ध होमर्कभिः करणीयः भवेत् ।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:7(2), July, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

अनेन अधिवासकर्मणा नवानि यानि बिम्बानि सन्ति तानि प्रतिष्ठार्हाणि भवन्तीति वासाधिकारग्रन्थस्य उपदेशसर्वस्वः [१०]।

**६. कुम्भपूजा**

विम्बप्रतिष्ठाकर्मणि प्रधानक्रिया भवेत् कुम्भपूजा। पञ्चभूतेषु प्रकृत्यां विद्यमाना या भगवत्शक्तिः अस्ति तां शक्तिं मन्त्र-तन्त्र होमक्रियाभिः कुम्भजले समावाहय तां प्रतिदिनं उपचारैः अभिमन्त्रेण प्रोक्षणेन वा सर्वशक्तिसम्पन्नां कृत्वा सुमुहूर्तैः शक्तिसहितमन्त्रजलैः सहितां तां शक्तिं नवबिम्बेषु समावाहय समूर्तरूपं संपाद्य प्रतिदिनं अर्चनादिकं करणीयं भवतु इति आगमशास्त्रस्य उपदेशसर्वस्वः ।

सर्वकर्मसु इयं कुम्भपूजा प्रधाना। शुद्धं कुम्भं स्वीकृत्य तं तन्तुना अलङ्कृत्य उत्पवनेन जलेन संपूर्य तस्मिन् मङ्गलादीनि चन्दनोशीरकर्पूरतक्कोलादीनि निक्षिप्य आचार्यः प्राणायामपूर्वकशरीरशुद्धिं संपाद्य विम्बवशात् न्यासं कृत्वा प्रतिमारूपं ध्यात्वा रक्षां निधाय परमात्मानं कुम्भजले वैदिक्या पद्धत्या बुद्ध्या मत्या च सुसंरक्षयेत् । इयमेव कुम्भपूजा च कलशपूजा भवेत्[11] ।

**७. होमः**

कुम्भस्थशक्तेः पवित्रीकरणार्थं होमः कार्यः। असौ सर्वयागफलप्रदः सर्वकामप्रदः भुक्तमुक्तिप्रदः सर्वसंपत्करान्वितः भवेत् ।

> **गार्हपत्यं ध्रुवं बेरं अन्वाहार्योत्सवं स्मृतम् । ज्ञा**
> **त्वाचाहवनीयस्य बलिबेरं प्रचक्षते[12] ।।**

श्रौताग्निवत् विम्बस्थापनं भवेद्वैखानसागमे । प्रतिष्ठाकर्मणि श्रौतक्रियोक्तवत् पञ्चाग्निकुण्डकल्पनं अग्निमथनं अग्निप्रतिष्ठा हौत्रशंसनं मूर्त्यावाहनं सर्वदैवत्यहोमः प्रधानहोमः महाशान्तिहवनं पारमात्मिक अष्टाशीतिमन्त्रविशेषहोमः अन्तहोमः होमशक्तिं कुम्भजले प्रक्षेपणं इत्येताः क्रियाः स्पष्टमुपदिष्टा आसन् वासाधिकारे''।

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:7(2), July, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

## ८. आवाहनम्

होमक्रियासमनन्तरं कुम्भं विम्बानि च गर्भालये निर्दिष्टे स्थाने संस्थाप्य मन्त्रपठनेन व्याहृतित्रयन्यासविधानेन प्रणवाक्षरप्राधान्येन च

**कूर्चेनादाय तच्छक्तिं ध्रुवेरस्य मूर्धनि।**
**आवाहयेत्तु तत्त्छक्तिं पञ्चमूर्तिक्रमेण वै ।।**

**अथवाचार्य हस्तेन तोयपुष्पादिनाहवयेत् ।**
**अचले देवदेवेशं तद्व्याप्तं तिष्ठति श्रुतिः[14] ।।**

कुम्भस्थपवित्रजलेन तां शक्तिं नवानां मूर्तीनां मूर्ध्नि मूर्तिमन्त्रैः आवाहय देवदेवेशं अचलेन मार्गेण संस्थापनं कृत्वा आचार्यः देश-जन-भक्त-ग्राम-अर्चकपाचकादीनां क्षेमस्यैर्यधैर्यानुग्रहसंपादनाय प्रार्थनां करोति । इदमेव आवाहनं कर्म भवेत् ।

## उपसंहारः

निष्कलरूपः परमात्मा अनेन साकारं ध्रुत्वा भक्तान् अस्मान् अनुगृहणातीति साकारदर्शनेनानेन अस्माकं सर्वेषां नेत्राणाम् मनसः शरीराणां आह्लादं वैदिकं आनन्दमयं पावनं पुनीतं च आपादयते इति नास्ति विप्रतिपत्तिः।

**कलावागमसम्मतम्** इति तत्रवचनानुसारं अस्माकं जीवनं अनेन आगमशास्त्रोक्त बिम्बप्रतिष्ठाद्वारा सफलं धन्यं भवेदिति नास्ति निष्कर्षः ।

***विग्रहाराधना चैषा वर्धतामाभिवर्धताम्***

## अधस्सूची

1. सीतोपनिषत् ४
2. वासाधिकारः, १, १०१-१०१
3. तत्रैव
4. वासाधिकारः ति.ति.दे. मुद्रणम्, तिरुपतिः २०२२
5. वासाधिकारः, ७,३

Cover Page

INTERNATIONAL JOURNAL OF MULTIDISCIPLINARY EDUCATIONAL RESEARCH
ISSN:2277-7881(Print); IMPACT FACTOR :9.014(2025); IC VALUE:5.16; ISI VALUE:2.286
PEER REVIEWED AND REFEREED INTERNATIONAL JOURNAL
( Fulfilled Suggests Parametres of UGC by IJMER)
Volume:14, Issue:7(2), July, 2025
Scopus Review ID: A2B96D3ACF3FEA2A
Article Received: Reviewed : Accepted
Publisher: Sucharitha Publication, India
Online Copy of Article Publication Available : www.ijmer.in

6. वासाधिकारः, ७,५
7. वासाधिकारः, ७, ६-९
8. सप्तमोऽध्यायः
9. वासाधिकारः ७, ९३-११७
10. ७, १५१-२००
11. वासाधिकार १०, १०-४७ प्रभृति अध्यायपर्यन्तम्
12. वासाधिकारः ८, ९
13. १३ अध्यायः
14. वासाधिकारः १५, ४-५

**आधारग्रन्थाः**

1. **आगमविमर्शः**
संस्कृतपरिषत् उस्मानियाविश्वविद्यालयः
हैदराबाद्, २०११

2. **वासाधिकारः**
तिरुमल तिरुपति देवस्थानम्
तिरुपतिः, २०२२

3. **श्रीवैखानसकल्पसूत्रम्**
श्रीविखनसट्रस्ट्
तिरुमल, २०२५